Semester -II, CC-3, Section-C, Important Prose romances and fables – Shukasaptati.

## शुकसप्ततिकथा

संस्कृतसाहित्यस्य समृद्धासु शाखासु कथासाहित्यम् भवति अन्यतमम्। भारतवर्षे प्रायेण सर्वेषां मनुष्याणां कथाश्रवणे या प्रवृत्तिः दृश्यते तस्याः एव कथासाहित्यस्य आविर्भावः इति वक्तुं शक्यते। तस्मात् कथानाम् उल्लेखः वेदेषु, पुराणेषु, रामायणे, महाभारते तथा काव्येषु नाटकेषु च दृश्यते। परन्तु उपस्थापनस्य वैचित्र्यवशात् एका अपि कथा वैचित्र्यम् उपादेयत्वं च प्राप्नोति। कथाश्रवणेन मानवां चित्तेषु कश्चित् आनन्दः जायते। न केवलम् एतदेव , अपि तु कथासाहित्येन नीतिशिक्षा अपि प्राप्यते। वेदादिग्रन्थेभ्यः या नीतिशिक्षा लभ्यते सा शिक्षा सर्वदा न तु सुखग्राह्या भवति, विशेषतः बालकानां कृते। परन्तु कथासाहित्येभ्यः या शिक्षा लभ्यते तां शिक्षां तु सर्वे एव सादरं गृह्णति इति कथासाहित्यस्य वैशिष्ट्यम्। संस्कृतसाहित्येषु साहित्यरूपेण याः कथाः प्राप्यन्ते तेषु शुकसप्ततिकथा इति कथासाहित्यम् संस्कृतगद्यसाहित्यस्य ऐतिह्यम् तथा अयं ग्रन्थोऽपि भवति पञ्चतन्त्रादिवत् कश्चन माहात्म्यमण्डितो ग्रन्थः।

अस्य ग्रन्थस्य संस्करणद्वयम् प्राप्यते। चिन्तामणिभट्टकृतम् संस्करणम्, पूर्णभद्रस्य जैनसंस्करणं च। किञ्च देवदत्तविरचितस्य कस्यचित् लघुसंस्करणस्य अपि प्रचलनम् अस्ति। शुकसप्ततिकथायाः मूलं रूपम् साम्प्रतम् विलुप्तम्। चिन्तामणिभट्टस्य बृहत्संस्करणम् किञ्चित् प्राचीनसंस्करणं भित्तीकृत्य एव प्रणीतम् इति सम्भाव्यते।

समासेन अत्र एवं कथा श्रूयते यत्, देवदासनामकस्य कस्यचित् ब्राह्मणस्य एकः शुकपक्षी आसीत्। देवदासस्य परमासुन्दरीं पत्नीं प्रति राजः दृष्टिः आपतिता। सा च पत्नी यदा बहिः गतवती तदा राजा तस्याः अपहरणनिमित्तम् केनचित् कर्मव्याजेन देवदासं देशान्तरं प्रेरयितुम् मनश्चकार। देशान्तरगमनात् प्राक् एव देवदासोऽपि तस्य शुकपक्षिणः उपरि कर्मजातं समर्पितवान्। अपरतः गृहकर्त्री प्रति नक्तं यदैव गृहात् बहिः गन्तुम् उद्युक्ता अभवत् शुकपक्षी अपि तस्याः मनोगतं चिन्तनं तस्यै एकैकां कथां श्रावयामास। गृहकर्त्री अपि तदा गृहं त्यक्तुं समर्था नाभवत्। एवंक्रमेण सप्ततिः रात्रौ सप्ततिकथां श्रावयित्वा शुकपक्षी देवदासस्य पत्न्याः चरितस्य पवित्रतां संरक्षितवान्। अस्मिन्नेव अवसरे देवदासस्य गृहप्रत्यावर्तनम् अभवत्। शुकेन कथितानां सप्ततिकथानां संकलनमेव शुकसप्ततिकथा इति परिचीयते।

किंवदन्त्यनुसारम् शुकस्य रूपधारी महात्मा नारद एव देवराजस् इन्द्रस्य समीपे कथानां वर्णनं कृतवान्। परन्तु वृत्त्यनुसारम् वणिजम् मदनविनोदम् तथा तस्य पत्नीं प्रभावतीम् चाश्रित्य एव कथाः विरचिताः। कुपथगामिनः कुलाङ्गारस्य मदनविनोदस्य कथां चिन्तं चिन्तं तस्य पिता हरिदत्तः अतीव चिन्तितः अभवत्। तदा कश्चित् ब्राह्मणः हरिदत्ताय स्वगृहपालितयोः शुकसार्योः उपढौकनरूपेण दानं कृतवान्। नीतिविषये पण्डितस्य शुकस्य मुखात् काचित् कथां श्रुत्वा मदनविनोदः विलासव्यसनादिकं परित्यज्य वाणिज्यार्थं देशान्तरं गतवान्। स्वामिनि अनुपस्थिते मदनविनोदस्य पत्नी प्रभावती अवैधप्रेम्नः चरितार्थाय प्रत्यहं सन्ध्यायाम् तस्य उपपत्या सह मिलनार्थम् रहसि गृहात् बहिः यदैव पदं कृतवती तदैव सारी ताम् भर्त्सितवती, शुकश्च प्रत्यहं

सन्ध्यायाम् एकैकां मनोज्ञां कथां श्रावयित्वा तां शाययति स्म। एवंक्रमेण सप्ततिदिवसेषु सप्ततिकथासु समाप्तासु मदनविनोदः गृहं प्रत्यागतवान्।

शुकसप्ततिकथासु पञ्चतन्त्रवत् नारीणां कपटप्रणयः, अविश्वासः इत्यादयः केचन कुविषयाः वर्णिताः। केषाञ्चित् मतानुसारम् ग्रन्थोऽयं गद्येन विरचितः आसीत्। परवर्तिनि काले अत्र नीत्युपदेशात्मकाः श्लोकाः सन्निविष्टाः अभवन्। कथासु अधिकाः एव कथाः विवाहितानां रमणीनाम् अवैधप्रणयं समाश्रित्य विरचिताः। साहित्यगुणाः अपि नैव दृश्यन्ते। चिन्तामणिभट्टविरचितस्य शुकसप्ततिकथाग्रन्थस्य भाषा सावलीला। गद्यकाव्यस्य समासबाहुल्यम् अत्र नास्ति। गद्यम् अत्र स्वच्छम्, प्राणस्पदम् तथा आभिजात्यपूर्णम् इत्यलं विस्तरेण इति दिक्॥